जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टितैः ।
तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा ॥
बलप्राणेन शूराणां समाजोत्सवसन्निधौ ।
अरज्यत जनः सर्व्वः सोत्कृष्टनिनदोत्थितः ।
बलिनो संयुगे राजन् ! वृत्रवासवयोरिव ।
प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः ॥
आकर्षेतामथान्योन्यं जानुभिश्चाभिजघ्नतुः॥१२॥
ततः शब्देन महता भर्त्सयन्तौ परस्परम् ।
व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ॥
बाहुभिः समसज्जेतामायसैः परिघैरिव ।
चकर्ष दोर्भ्यामुत्पाट्य भीमो मल्लममित्रहा ॥
विनदन्तमभिक्रोशन् शार्दूल इव वारणम् ।
समुद्यम्य महाबाहुर्भ्रामयामास वीर्य्यवान् ॥
ततो मल्लाश्च मत्स्याश्च विस्मयं चक्रिरे परम् ।
भ्रामयित्वा शतगुणं गतसत्त्वमचेतनम् ।
प्रत्यपिंषन्महाबाहुर्म्मल्लं भुवि वृकोदरः ॥१३॥
तस्मिन् विनिहते मल्ले जीमूते लोकविश्रुते ।
विराटः परमं हर्षमगच्छद्बान्धवैः सह ॥
स हर्षात् प्रददौ वित्तं बहु राजा महामनाः ॥”
इति विराटपर्व्वणि १२ अध्यायः ॥
एषां टीका यथा ।“दुःखेन स्वप्रकटनराजाज्ञा-लङ्घनद्वन्द्वेन । विश्रुतं लोकसमक्षम् । शार्दूल-शिथिलः सिंह इव व्याघ्र इव वा शिथिलः सावधः । स्यात् सिंहेऽपि च शार्दूल इति दर्शनात् । कक्षा कच्छम् । सम्पातः संघर्षः ॥ १० ॥ सङ्कटैः कङ्कटः करचर्षणः क्रिया: कड़ा इति प्रसिद्धः । कृतप्रतिकृतैः परप्रयुक्तप्रति-कृतैः । चित्रैर्विचित्रैरन्यैरिति शेषः ॥ ११ ॥ सन्निपातेत्यादि । एते मल्लानां शिक्षाविशेषाः । सन्निपातैः परस्परसंघातैरवधूतैर्बहुसहिष्णुजा-घातैः प्रमाथैः पातयित्वा पेषणैः । उन्मथनैः अन्तरीक्षे भुजाभ्यां मथनैः । क्षेपणैः स्थानात् प्रच्यावनैः । वज्राङ्गुलिकरो मुष्टिः ।
‘अवाङ्मुखं स्कन्धगतं भ्रामयित्वा तथैव यः ।
चिप्तस्य शब्दः स भवेद्वराहोद्धूतनिस्वनः ॥
तर्ज्जन्यङ्गुष्ठमध्येन प्रसारितकरो हि यः ।
संप्रहारस्तलाख्यस्तु संग्रहो वज्रमिष्यते ॥’
अहेवज्रतुल्यमल्लमुष्टिर्वज्रमित्यर्थः ।
‘प्रहृताङ्गुलिहस्तेन प्रहृष्टिः प्रहृतिः स्मृता ।
द्विगुणीकृतबाहुर्यस्तदीयार्थं यथाबलम् ॥
प्रहारः सशलाका स्यात् पादोद्धूतः पदा-हतम् ॥’
जानुभिश्चाश्मनिर्घोषैःपाषाणघोषसदृशध्वनिभिः करणैर्यान्यवघट्टनानि तैः । बलप्राणेन बलो-त्कर्षेण । सोत्कृष्टनिनदोत्थितः उत्क्रोशन-निनदोत्थानसहितः । प्रकर्षणं बाहुसंमुखा-नयनं प्रकृष्टाकर्षणं तदेवाकर्षणमीषत्सम्मुखा-नयनम् । अभ्याकर्षः समन्ततः कर्षणम् । विकर्षणं पश्चात् नयनं सदैव विपरीतकर्षणा-मुच्यते उपसर्गभेदादर्थभेदोऽपीति ॥ १२ ॥ शत-गुणं शतवारम् ॥ १३ ॥” इत्यर्ज्जुनमिश्रकृत-भारतार्थदीपिका ॥

मल्ला, स्त्री, (मल्लते धारयति विलासादिकमिति । मल्ल धारणे + अच् । स्त्रियां टाप् । ) नारी । पत्रवल्ली । मल्लिका । इति शब्दरत्नावली ॥ ( लोठनराजपत्नी । यथा, राजतरङ्गिण्याम् । ८ । १६९७ ।
“तमेव पुत्रा शोचन्ती शोकशङ्कुहताशया ।
ततः प्रपेदे प्रलयं मल्ला लोठनवल्लभा ॥”)

मल्लारः, पुं, ( मल्लं ऋच्छति प्राप्नोतीति । ऋ + अण् । ) रागविशेषः । स तु षण्णां रागाणां मध्ये द्वितीयः । यथा,—
“आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम् ॥
हिल्लोलश्चाथ कर्णाट एते रागाः प्रकी-र्त्तिताः ॥”
अस्य षट्रागिण्यो यथा,—
“वेलावली पूरवी च कानड़ा माधवी तथा ।
कोड़ा केदारिका चैव मल्लारस्य प्रिया इमाः॥”
अस्य गानसमयः ।
“मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥”
अस्य स्वरूपं यथा,—
“शङ्कावदातं पलितं दधानः
प्रलम्बकर्णः कुमुदेन्दुवर्णः ।
कौपीनवासाः सविहारचारी
मल्लारराग: शुचिशान्तमूर्त्तिः ॥”
इति सङ्गीतदामोदरः ॥
( तथा च सङ्गीतदर्पणे रागाध्याये ।
“भैरवः पञ्चमो नाटो मल्लारो गौड़मालवः ।
देशाख्यश्चेति षड्रागाः प्रोच्यते लोकविश्रुताः ॥”
“मेघमल्लारिका मालकौशिकः पटमञ्जरी ।
आशावरीति विज्ञेया रागा मल्लारसंश्रयाः ॥”
इति रागार्णवमतम् ॥)

मल्लारी, स्त्री, ( मल्लार + ङीप् । ) वसन्तरागस्य रागिणी । यथा,—
“आन्दोलिता च देशाख्या लोला प्रथम-मञ्जरी ।
मल्लारी चेति रागिण्यो वसन्तस्य सदानुगाः ॥”
इति सङ्गीतदामोदरः ॥
मेघरागस्य रागिणी । इति हलायुधः ॥ ( अस्या उदाहरणादिकं यथा संगीतदर्पणे ।
“मल्लारी सपहीना स्यात् ग्रहांशन्यासधैवता ।
औड़वा पौवरीयुक्ता वर्षासु सुखदा सदा ॥”
ध नि रि ग म ध । अस्या ध्यानं यथा,—
“गौरी कृशा कोकिलकण्ठनादा
गीतच्छलेनात्मपतिं स्मरन्ती ।
आदाय वीणां मलिना रुदन्ती
मल्लारिका यौवनदूनचित्ता ॥”)

मल्लिः, पुं, (मल्लते धारयति विज्ञानमिति । मल्ल + “सर्व्वधातुभ्य इन् ।” उणा० ४ । ११७ । इति इन् । ) चतुर्विंशतिरूताईतां मध्ये ऊनविंश-जिनः । इति हेमचन्द्रः ।१ । २८ ॥

मल्लिः, स्त्री, ( मल्ल + इन् । ) मल्लिका । इति शब्दरत्नावली ॥

मल्लिकः, पुं, ( मल्लाते धार्य्यतेऽसौ । मल्ल + इन् । स्वार्थे कन् । ) मलिनचञ्चुचरणयुक्तहंसः । मलिनैः किञ्चिद्धूसरवर्णैराज्ञोहितैश्चञ्चुचरणै-रुपलक्षितः शुक्लहंसः । इत्यमरभरतौ ॥ गुणासुपाधिविशेषस्य । ( यथा, भरतमल्लिकः । तथा च भट्टिकाव्यटीकारम्भे मङ्गलाचरण-श्लोकः ।
“नत्वा शङ्करमम्बष्ठगौराङ्गमल्लिकात्मजः ।
भट्टिटीकां प्रकुरुते भरतो मुग्धबोधिनीम् ॥”)

मल्लिका, स्त्री, ( मल्लिरेवेति । मल्लि + स्वार्थे कन् । स्त्रियां टाप् । यद्वा, मल्लिर्हंस इव शुक्ल-त्वात् । मल्लि + इवार्थे कन् । ) स्वनामख्यात-पुष्पवृक्षः । वेलफुल इति भाषा ॥ ( यथा, काव्यादर्शे । २ ।
“मल्लिकामुकुले चण्डि ! भाति गुञ्जन्मधुव्रतः ।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव ॥” )
तत्पर्य्यायः । तृणशून्यम् २ भूपदी ३ शतभीरुः ४ । इत्यमरः । २ । ४ । ६६ ॥ तृणशून्या ५ शीतभीरुः ६ । इति भरतः ॥ भद्रवल्ली ७ गौरी ८ वनचन्द्रिका ९ प्रिया १० सौम्या ११ नारीष्टा १२ गिरिजा १३ सिता १४ मल्ली १५ मदयन्ती १६ चन्द्रिका १७ मोदिनी १८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । चक्षुष्यत्वम् । मुखपाककुष्ठविस्फोटकक्षत-विषव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफ-नाशित्वम् । इति राजवल्लभः ॥ उष्णत्वम् । लघुत्वम् । वृष्यत्वम् । वातपित्तास्रव्याध्य-रुचिनाशित्वञ्च । इति भावप्रकाशः ॥ * ॥ अस्या उत्पत्तिर्यथा,-
“विचरन्तं तदा भूयो महेशं कुसुमायुधः ।
आरात् स्थित्वाग्रतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमग्रतो दृष्ट्वा क्रोधाद्ध्मातदृशा हरः ।
स्मरमालोकयामास शिखाग्राच्चरणान्तिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् ! पादादारभ्य कक्षवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्ससर्ज्ज धनुः श्रेष्ठं तज्जगामाथ पञ्चधा ॥
यदासीन्मुष्टिबन्धं तु रुक्मपृष्ठं महाप्रभम् ।
स चम्पकतरुर्ज्जातः सुगन्धाढ्यो गुणाकृतिः ॥
नाहस्थानं शुभाकारं यदासीद्वज्रभूषितम् ।
तज्जातं केशवारण्यं बकुलं नामतो नगैः ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजविभूषिता ॥
नाहोपरि तथा मुष्टौ स्थानं चन्द्रमणिप्रभम् ।
पञ्चगुल्माभवज्जातो शशाङ्ककिरणोज्ज्वला ॥
ऊर्द्धं मुष्ट्या अधः कोट्याः स्थानं विद्रुमभूषितम् ।
तस्माद्बहुपुटा मल्ली सञ्जाता विविधा मुने ! ॥”
इति वामनपुराणे ६ अध्यायः ॥
मत्स्यविशेषः । मृतपात्रभेदः । इति मेदिनी । के, १२७ ॥ पानपात्रम् । इति हेमचन्द्रः ॥

मल्लिकाक्षः, पुं, ( मल्लिकापुष्पमिव अक्षिणी यस्येति । “अक्ष्णोऽदर्शनात् ।” ५ । ४ । ७६ ।